# Sutaproktam Shivakailasamauliviharavarnanam

# સૂતપ્રોક્તં શિવકૈલાસમૌલિવિહારવર્ણનમ્

## Document Information

Text title : Sutaproktam Shivakailasamauliviharavarnanam

File name : shivakailAsamaulivihAravarNanamsUtaproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 22 - shivagaurIsaMvAde kailAsaliNgavarNanam | 23-35||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# સૂતપ્રોક્તં શિવકૈલાસમૌલિવિહારવર્ણનમ્

સૂતઃ -
કૈલાસેઽત્ર મહાદેવસ્સન્નિધત્તે સદૈવ હિ ।
દેવ્યા મણિમયે સૌધે વિહરત્યેષ શઙ્કરઃ ॥ ૨૦॥

તદ્વિહારં શૃણુષ્વાદ્ય સર્વપાપવિનાશનમ્ ।
નાનાચિત્રવિચિત્રાશ્ચ ક્રીડાસ્તાઃ પરમેશિતુઃ ॥ ૨૧॥

દેવ્યા સહ સુરશ્રેષ્ઠાઃ કેન વા વર્ણ્યતે હિ તાઃ ॥ ૨૨॥

- -
રુદ્રાણ્યો નવયૌવનોચ્ચલકુચાસ્તાસ્સોમધામ્ના નિભા
રત્નોત્થામલકાન્તિભૂષિતતનૂવલ્યઃ પ્રભાભાસુરાઃ ।
સમ્બદ્ધસ્તનચેલકેશવલયાસ્સેવાધિકારાદરા
રાજન્તે કલધૌતસાનુશિખહે લીલાઝણન્નપુરાઃ ॥ ૨૩॥

ઉદ્યત્કાવ્યનિભાચ્છચમ્પક મહાનાસાલસન્મૌક્તિકા-
સ્તારાકારસુહીરહારવલયૈસ્તાસ્તત્ર વિદ્યુલ્લતાઃ ।
રુદ્રાશ્ચાપિ મહેશ્વરં ત્રિજગતામાધારભૂતં હરં
તત્તત્કાલસુસેવનૈરનુપમૈશ્શ્રાન્તિં વિહાયાદરાત્ ॥ ૨૪॥

સ્નાનોદ્યન્મણિસુન્દરૈચ કલશૈસ્સ્રગ્ગન્ધધૂપાર્પણૈ-
ર્દીપૈઃ કેશસુધૂપનૈઃ પરિકરૈઃ પર્યઙ્કવિશ્રાણનૈઃ ।
છત્રૈશ્ચામરવીજનૈઃ પ્રપદકૈરાદર્શતામ્બૂલકૈ-
ર્વીણાભિઃ પટવાસખડ્ગસુકરૈસ્સેવન્તિ શર્વં શિવામ્ ॥ ૨૫॥

રુદ્રાણ્યો નવકોટયશ્ચ તરુણા રુદ્રાશ્ચ કોટ્યો દશ
ભૈરવ્યોઽથ દિગમ્બરાશ્ચ સતતં કોટીભિરન્વાસતે ।
યોગિન્યોઽથ ત્રિકોટયશ્ચ પરિતસ્તે ડાકિનીકોટયો
રોહિણ્યા સહિતેન્દુધામવદનાસ્સેવન્તિ શમ્ભું શિવામ્ ॥ ૨૬॥

કૈલાસે નવશક્તિરત્નવિલસત્પીઠે મહાતત્ત્વવા-
ગ્જાતેનૈકકકોટિવિસ્તરયુતે શ્રીચક્રમધ્યઙ્ગતે ।
બિન્દૌ ચન્દ્રદિનેશકોટિયુગલે મઞ્ચે ચતુષ્પીઠકે
પઞ્ચબ્રહ્મમયે વયં ગિરિજયા સાર્ધં હૃદાદધ્મહે ॥ ૨૭॥

શશિપ્રસૃમરૈઃ કરૈસ્સિતસિતાયમાનો ગિરિઃ
પ્રભાતતસુધામ્બુધેશ્ચલતરઙ્ગહસ્તોત્થયા ।
સમુચ્ચલિતનૌકયા સકલરત્નસઙ્કુલયા
સુધાંશુશકલાલકો વિહરતિ સ્ફુટં સોઽમ્બયા ॥ ૨૮॥

સ્વચ્છાદ્રિપારદમહાકલધૌતશૈલસાનુપ્રભાસમધિકોન્નતપાણ્ડરાઙ્ગમ્ ।
ચઞ્ચદ્વિષાણમુકુટીતટલમ્બમાનસચ્ચામરૌઘપરિવીજિતકર્ણતાલમ્ ॥ ૨૯॥

કાન્ત્યા સ્વયા પરિમુષન્તમિવોધતાંશુમુક્ષાણમદ્રિતનયાપતિરક્ષિફાલઃ ।
આરુહ્ય યાતિ નગરાજસુતાસહાયઃ ॥ ૩૦॥

ઉક્ષાધસ્તલપક્ષતિ પ્રચલિતો દેવસ્ય પાદામ્બુજે
સ્વસ્કન્ધે મણિપાદુકોત્તમલસત્સાનન્દનામા ગણઃ ।
પાહીશેતિ વદઞ્છિવ મહાદેવ પ્રભો માં સદા
તારાનાથકલાધર શ્રુતિશિરઃકોટીરપાલીગત ॥ ૩૧॥

કૈલાસમૌલિધવલોત્તમશ઼ૃઙ્ગસંસ્થલિઙ્ગાવલં સમભિવીક્ષ્ય મહોરુહર્ષઃ ।
પશ્યેતિ તામગસુતાં પ્રવદત્યભીક્ષ્ણં ત્ર્યક્ષોઽક્ષતાક્ષમનસા પરિચિન્તનીયઃ ॥ ૩૨॥

સૌવર્ણરત્નખચિતૈર્મણિજાલક્લૃપ્તૈશ્ચક્રે મહોન્નતતલે શશિધામકુમ્ભમ્ ।
દેવ્યા રથં રથપતિઃ પ્રથિતો હિ દેવૈરારુહ્ય યાતિ નગમૌલિમહો દ્વિજેન્દ્રાઃ ॥ ૩૩॥

નાનારત્વયુતપ્રભાતતિતતં મુક્તાચ્છગુચ્છાન્વિતં
પાલીપાલિમરાલરાજનિકરૈર્મુક્તાવિતાનૈર્યુતમ્ ।
ભ્રાજદ્દિવ્યપતાકચામરયુતં છત્રૈરપારૈર્યુત-
ઞ્ચારુહ્યાખિલશૈલરાજમુતયા દિવ્યં વિમાનં હરઃ ॥ ૩૪॥

કૈલાસે નવમૌલિપાલિષુ સદા પશ્યન્પ્રયાતીશ્વરો
દેવાદીનખિલાન્વિલોકયતિ વૈ તલ્લોકલોકાનપિ ।
બ્રહ્માણ્ડાન્તિકતસ્સ્ફુરત્સુરતટિન્યાટોપમૌલિશિવો
વિશ્વં ચિત્રમપારચિત્રકયુતં યુક્તોઽમ્બયા કેવલમ્ ॥ ૩૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે સૂતપ્રોક્તં શિવકૈલાસમૌલિવિહારવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૨૨ - શિવગૌરીસંવાદે કૈલાસલિઙ્ગવર્ણનમ્ । ૨૩-૩૫ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 22 - shivagaurIsaMvAde kailAsalingavarNanam . 23-35..

Notes:

Sūta સૂત narrates about the pastimes of Śiva શિવ and Devī દેવી residing and being worshipped at the Peak of Mount Kailāsa કૈલાસ મૌલિ.

Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

---

*Sutaproktam Shivakailasamauliviharavarnanam*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*